**अन्वाधीयमान** (anv-ādhīyamāna) *adj.* which is being added with fuel अग्नीनन्वाधीयमानान् यजमान उपतिष्ठते BhārŚS. iv.1.11; अग्निर्हव्यवाडिह तानावहतु पौर्णमासं हविरिदमेषां मय्यामावास्यं हविरिदमेषां मयीति यथालिङ्गमाहवनीयेऽन्वाधीयमाने जपति ĀpaŚS. iv.1.8; यजमानोऽग्निं गृह्णामि सुरथं वसून् ... इति त्रीनाहवनीयेऽन्वाधीयमाने जपति VaikhāŚS.3.2.

**अन्वाधेय** (anv-ādheya) *n.* **1** property presented after marriage to wife by husband or that to doughter by father or relatives पैतृकं क्रीतमाधेयमन्वाधेयं प्रतिग्रहम् VāsiDS. 16.16; शुल्कमन्वाधेयमन्यद् वा बन्धुभिर्दत्तं बान्धवा हरेयुः। इति स्त्रीधनकल्पः ArthŚā. ii.16.7 (3.2); अन्वाधेयं च यद्दत्तं पत्या प्रीतेन चैव यत्। पत्यौ जीवति वृत्तायाः प्रजायास्तद्धनं भवेत् ManuSm. 9.195; BālamBha. ii. 265.4 (*on* 2.145); विवाहात्परतो यत्तु लब्धं भर्तृकुलात्स्त्रिया। अन्वाधेयं तदुक्तं तु लब्धं बन्धुकुलात्तथा KātySm. 899; SmṛtiCan. iv. 660.5; ManvaVi. 1215.25 (*on* 9.195); DīpKa. 58.28 (*on* 2.144); BālamBha. ii.266.14 (*on* 2.148); **2** the word *anvādheya* विवाहात्परत इत्यनेनान्वाधेयपदस्थानुशब्दार्थो विवृतः SmṛtiCan. iv. 660.8; विवाहात्परतो लब्धस्यान्वाधेयपदोपात्तत्वात् BālamBha. ii.263.24 (*on* 2.145)

**अन्वाधेयक** (anvādheya-ka) *n.* property presented after marriage to wife by husband or to daughter by father or the relatives पितृमातृसुतभ्रातृदत्तमध्यग्न्युपागतमाधिवेदनिकं बन्धुदत्तं शुल्कमन्वाधेयकमिति स्त्रीधनम् ViṣṇuSm. 17.18; YājñaSm. 2.144; AgniP. 255.31; Aparā. 753.6 (*on* 2.144); VīraMi. 620.21 (*on* 2.144); VīraMi. (Vyavahāra.) 542.3; अन्वाधेयकं परिणयनादनु पश्चादाहितं दत्तम् Mitā. 251. 14 (*on* 2.144); CaturCin. iii (1). 530.21.

**अन्वाधेया** (anv-ādheyā) *f.* maternal aunt अथास्यैते संभारा उपक्लृप्ता भवन्ति ... द्वौ दासावनुजायै च पुत्रोऽन्वाधेयायै च BaudhŚS. ii.205.2; iii.285.12; VādhūŚS. iii.69.37.

**अन्वाधेयिक** (anvādheyi-ka) *n.* property presented after marriage to the wife by husband or to daughter by father or the relatives शुल्कान्वाधेयिकयोः स्वरूपं कात्यायनेनोक्तम् – ... विवाहात् परतो यत्तु लब्धं भर्तृकुलात् स्त्रिया। ... अन्वाधेयं तु तत् SmṛtiCan. iv.652.11.

**अन्वाध्य** (anv-ādhyá) *m.* (pl.) a type of divine beings अथैते दैवा आप्याः साध्या अन्वाध्या मरुतस्तमेतऽउभये देवमनुष्याः ... संवत्सरः रक्षन्ति ŚatBr. XIII.iv.2.16.

**अन्वानयन** (anv-ānayana) *n.* act of applying or application, the fourth member of the syllogism निदर्शनेऽनुमेयसामान्येन सह दृष्टस्य लिङ्गसामान्यस्यानुमेयेऽन्वानयनमनुसंधानम् PadārthaSaṁ. 249.8; प्रतीतस्य लिङ्गसामान्यस्यानुमेये साध्यधर्मिण्यन्वानयनं सद्भावोपदर्शनं येन वचनेन क्रियते तदनुसंधानम् NyāyKa. 249.17.

**अन्वानश्** (anv-ānaś-) I.P. to bring to or pervade with (enjoyment) यदा ते मर्तो अनु भोगमानडादिद्ग्रसिष्ठ ओषधीरजीगः VājaS. 29.18 (Uvaṭa अनुआनट् अनुव्याप्नोत्)

**अन्वानी** (anv-ānī-) I.U. **1A** to bring after **B** to supply, to procure **C** to bring (under control) **D** to bring to, to fetch **2A** to take towards **B** to take up, to carry **3** to consolidate **4** to bring after **5** to solicite **1A** to bring after सोऽस्यै वाच एकमक्षरमविच्छिद्य वाणिति व्यसृजत ... तदेतन्मण्डलमभवत्। तदन्वानैत् JaimiBr. 3.350; **1B** to supply, to procure यद्यन्नीयाद्धाना अस्मा अन्वावपेयुः सक्तूनस्मा अन्वावपेयुर्घृतमस्मा अन्वानयेयुः ĀpaŚS. x.16.13=BhārŚS. x.10.8; **1C** to bring (under control) संधिं वा तेन कृत्वा ...। हत्वा चास्य चमूं कृत्स्नां वशमन्वानयामहे MahāBhā. iv.29.12; **1D** to bring to, to fetch रथमन्वानयत्तस्मै MahāBhā. vii.122.43; **2A** to take towards तं ब्रह्मादायो उत्तरतस्तिष्ठन्नग्निमन्वानयत्युदग्रे ... इति BaudhŚS. i.194.13; **2B** to take up स यद्यहैनं करिष्यन् भवति नैनमन्वानयते BaudhŚS. ii.155.13; **3** bring together मुक्तमुष्टिषु संग्रामे किं रणेन करिष्यसि। क्रोशमात्रमतिक्रम्य बलमन्वानयामहे MahāBhā. iv. App. 1.52 (48); **4** to take or lead around, cf. **अन्वानीय2B**; **5** to solicit, cf. **अन्वानीय3**.

**अन्वानीय** (anvānī-ya) *ger.* **1** having brought or kept after प्रचरणकाल उद्धृत्य ... जुह्वामुपस्तीर्याधायाशयमन्वानीयाभिघार्योपांशु प्रचरति ĀpaŚS. vi.29.22; **2A** having brought near पूर्वमपरस्मान् मथित्वा प्रणयेद् यदि त्वरेत तत एव प्राञ्चमुद्धृत्य दक्षिणाग्निमन्वानीय सायंप्रातर्जुहुयात् MānŚS. 99.2; 99.16; **2B** having taken or led around वृषवत्सतरीमग्निं प्रदक्षिणमन्वानीयाग्नेः पूर्वतस्तप्तलोहेन दक्षिण ऊरौ ... विसृजेत् प्राश्नम् BālamBha. i.587.20 (*on* 1.252); **3** having solicited व्यसनैः क्लिश्यमानं हि यो मित्रं नाभिपद्यते। अनुनीय (v.l. अन्वानीय) यथाशक्ति तं नृशंसं विदुर्बुधाः MahāBhā. v.91.10.

**अन्वानु** (anv-ānu-) II.P. to sound through or towards यः पूर्वीरन्वानोनवीति। बृहस्पतिः सः ṚV. x.68.12.

**अन्वानोदितसकलकर्मन्** (anvānodita-sakalakarman) *adj.* who has kept aside all the activities कलौ नास्त्येव ... गतिरन्यथा। इति तदनु ... तन्मन्वानोऽन्वानोदितसकलकर्मा हरिनाममात्रशरणः शरणमपि विस्मृतवानस्मि CaitaCa. 23.2 (1)

**अन्वान्त्र** (ánv-āntra) *adj.* [P.vi.2.2] being in the entrails or intestines, VIŚVA.

**अन्वान्त्र्य** (ánv-āntrya) (also ánv-āntryà, VIŚVA.) *adj.* [P.iv.3.55; vi.1.185] along or being in the entrails अन्वान्त्र्यं शीर्षण्य१मथो (v.l. अन्वान्त्र्यं शीर्षण्य१मथो VIŚVA. Ed.) पार्ष्टेयं क्रिमिम् (v.l. क्रिमीन्)। ... वर्चसा जम्भयामसि AV.ii.31.4 (*but* Sāy. 'तित् स्वरितम्' इत्युभयत्र स्वरितत्वम्); AV.(P.) ii.15.4; अन्वान्त्र्यम् ... स्फ्यावंसाविति यकारान्तः संयोगः APrāti. 174.

**अन्वाप्** (anv-āp-) V.P. **Ai** to attain, to reach य एवं वेदाथ यत्सव्येन पदा समगृभ्णात्तन्माध्यंदिनं सवनमभवत्तद्विस्रंसत तद्विस्रस्तं नान्वाप्नोत् AitBr. 13.3 (359); तमतिसृज्यानुलिप्समानो नानुलभेत नान्वाप्नुयादेवऽ ह स यज्ञं नान्वाप्नोति ŚatBr. (K.) IV. ii.1.26; IV. v.4.11; **Aii** to obtain, to get यदाश्रौषमर्जुनो देवदेवम् ... त्र्यम्बकं तोष्य युद्धे। अवाप (v.l. अन्वाप) तत्पाशुपतं महास्त्रं तदा नाशंसे विजयाय MahāBhā. i.1.109; **B** to bring forth यदा ते मर्तो भोगमन्वापदथ ग्रसितृतम ओषधीरगारीः Nir. 6.8 (114.17)

**अन्वाप्** (anv-āp) *gr.* the word or form *anvāp* (possessed by water all around) अयमपीतरोऽनूप एतस्मादेव। अनूप्यत उदकेन। अपि वान्वाबिति स्यात् Nir. 2.22 (55.5)

**अन्वापदीन** (anvāpadīna) *m.* name of a prince, PW.

**अन्वाप्तुम्** (anv-āptum) *inf.* to obtain, to get स त्वं वै हे गौतम तीर्थेन न्यायेन शास्त्रविहितेन विद्याम् ... इच्छ अन्वाप्तुम् BṛĀraUBh. (Śaṅ.) 766.6 (*on* vi.2.7)

**अन्वाप्याय्** (anv-āpyāy-) I.Ā. [DhātuPā. 1.517; cf. VIŚVA.; better अन्वाप्यै] to swell, to increase स भूर्भुव इत्येतैस्त्रि-भिरक्षरैर्गार्हपत्यमादधाति ... यत्सर्वैरादध्यात्ते एव द्वे इतराणि त्रीण्यन्वाप्यायन्ते ŚatBr. (K.) I. i.4.14.

**अन्वाप्यै** (anv-āpyai-) I.Ā. [DhātuPā. 1.1013] **A** to swell, to increase ध्रुवामाप्यायमानां यज्ञोऽन्वाप्यायते TaiS. I.vii.5.1; अमुमेवाप्यायमानमन्वाप्यायते वसीयान्भवति MaiS. ii.2.7 (ii.21.14); **B** (caus.) to make (one) wax अमुमेवैनमाप्यायमानमन्वाप्याययति TaiS. II.iii.5.3.

**अन्वाप्री** (anv-āprī-) IX.P. to propitiate प्राणा वै प्रयाजाः। प्राणानेव तत्प्रयजति। तत्प्रयाजानां प्रयाजत्वम्।ताननुयाजैरन्वाप्रीणाति KapiKaS. 41.7 (243.22)

**अन्वाफण्** (anv-āphaṇ-) I.P. to go or run quickly, to run along क्रतुं दधिक्रा अनु संतवीत्वत्पथामङ्कांस्यन्वापनीफणत् ṚV. iv.40.4; VājaS. 9.14; ŚatBr.V.i.5.19.

**अन्वाब्रू** (anv-ābrū-) II.P. to relate, to repeat स होवाचाषाढ आमारुणे यत् सहैव ब्रह्मचर्यमचराव सहान्वाब्रवीवहि JaimiBr. 1.271.

**अन्वाभक्त** (anv-ābhakta) *adj.* [*f.* –ā] **A** entitled to take a share after or with another यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकांसि चक्रिर इत्यत्र देवता अन्वाभक्ताः KauṣīBr. 15.2 (66.14); सर्वत्रैव स्विष्टकृदन्वाभक्तः ŚatBr. I.vii.3.7; II.iv.3.9; ŚatBr. (K.) I.iii.2.9; II.vii.1.6; स यदग्नये जुहोति सर्वत्र ह्येवाग्निरन्वाभक्तः ŚatBr. II.iv.2.12; ŚatBr. (K.) I.iii.3.10; II.v.3.5; विशो विश्वे देवा यत्र वै क्षत्रमुज्जयत्यन्वाभक्ता वै तत्र विट् ŚatBr. II.iv.3.6; ŚatBr. (K.) I.iii.2.6; तदमितः साचयोऽन्वाभक्ता भवन्त्यराजानः ... एतस्यै गृह्णीयात्तदेव छन्दांस्यन्वाभजेत् ŚatBr. III.iv.1.8; ŚatBr. (K.) IV. iv.1.7; तदेव होतृका अन्वाभक्ताः ŚatBr. XIII. v.4.24 = XIII. vii.1.13; XIII. vi.2.18; य उ एवैतामग्नेश्चोषसश्चान्वाभक्तिं वेद यत्र कामयतेऽन्वाभक्त इह स्यामित्यन्वाभक्तस्तत्र भवति JaimiBr. 1.210; 3.385; **B** caused or made to take a share तेनो ह पशवोऽन्वाभक्ता यन्मनुष्यानन्नु पशवः ŚatBr. II.iii.1.20; **C** accompanied स मन्त्रेणैवान्वाभक्तो विदिद्युतेऽसैव भ्रातृव्यानपहनानीति ŚaunakaU. 2.1.

**अन्वाभक्ति** (anv-ābhakti) *f.* act of taking a share य उ एवैतामग्नेश्चोषसश्चान्वाभक्तिं वेद यत्र कामयतेऽन्वाभक्त इह स्यामित्यन्वाभक्तस्तत्र भवति JaimiBr. 1.210.

**अन्वाभज्** (anv-ābhaj-) I.U. **A** to cause to take a share after or with another, to assign or give as a share यॉं आभजो मरुतो ये त्वान्वहन्वृत्र-मदधुस्तुभ्यमोजः ṚV. iii.47.3; सदस्यानेवान्वाभजति वासुसोपं नह्यति सर्वदेवत्यं